संस्कृत-वार्ता:

02.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· भाजपादलस्य वरिष्ठनेता प्रधानमन्त्री च अद्य भारतं स्वातन्त्र्यस्य शताब्दीवर्षपर्यन्तं विकसितराष्ट्रस्य स्थितिं प्राप्स्यति इति राष्ट्राय आश्वासनं दत्तवान्।

· केन्द्रीय अन्वेषण ब्यूरो (सीबीआई) द्वारा , अद्य कलकत्ता उच्चन्यायालये पश्चिमबङ्गस्य संदेशखालीनगरे अवैधभूमिप्रतिग्रहणस्य, धनाहरणस्य महिलानाम् उत्पीडनस्य च प्रकरणानाम् अन्वेषणस्य प्रारम्भिकस्थितिप्रतिवेदनं प्रस्तुतम्।

· संयुक्तराष्ट्रसङ्घे भारतस्य स्थायीप्रतिनिधिः रुचिरा कम्बोज् इत्यनया उक्तं यत् भारतं फिलीस्तीन इजरायलयोः च कृते 'द्विराज्यीय' समाधानार्थं प्रतिबद्धम् अस्ति।

· एशियायाः अन्तर्द्वाविंशीयमुष्टामुष्टि- प्रतियोगितायां भारतीयमुष्टामुष्टिक्रीडकाः आर्यनः, यशवर्धनसिंहः, प्रियांशुः, साहिलः च कजाखास्थानस्य आस्तानानगरे उपान्त्यचक्रे प्रवेशं प्राप्तवन्तः।

· आईपीएल् क्रिकेट्-क्रीडायां अद्य हैदराबाद-नगरे सनराइजर्स् हैदराबाद-दलं राजस्थान-रॉयल्स्-दलं विरुध्य क्रीडिष्यति।

<u>प्रधानमन्त्री-गुजरात प्रचारम्</u>

भाजपादलस्य वरिष्ठनेता प्रधानमन्त्री च अद्य भारतं स्वातन्त्र्यस्य शताब्दीवर्षपर्यन्तं विकसितराष्ट्रस्य स्थितिं प्राप्स्यति इति राष्ट्राय आश्वासनं दत्तवान्। श्रीमोदी अद्य गुजरातस्य आनन्द-सुरेन्द्रनगरयोः द्वयोः एव सभे सम्बोधितवान्। आनन्दनगरे सभां सम्बोधयन् सः अवदत् यत् एनडीए-शासनान्तर्गतं विगतेषु दशवर्षेषु देशेन महत् परिवर्तनं दृष्टम्। सः अवदत् यत् भारतं वैश्विककार्येषु एकं प्रमुखराष्ट्रत्वेन उद्भूतम् अस्ति तथा च विश्वम् अन्ताराष्ट्रियसङ्घर्षेषु भारतं मध्यस्थताकर्तृत्वेन पश्यति। विगतदशके देशस्य वैश्विकप्रतिबिम्बे महत्त्वपूर्णपरिवर्तनस्य विषये अपि सः अवदत् । सः काङ्ग्रेस-पक्षम् आक्रमितवान् यत् राजनैतिकलाभार्थं निर्धनानां शोषणं करोति एतत् दलम्, ओबीसी-समुदायस्य प्रति अन्यायं च करोति । श्रीमोदी आश्वासनं दत्तवान् यत्

तस्य सर्वकारः देशे धर्माधारितं आरक्षणं दातुं प्रयत्नान् निषिद्धान् करिष्यति। सुरेन्द्रनगरे निर्वाचनसभायां वदन् गुजरातस्य जनानां कृते आह्वानं कृतवान् यत् ते निर्वाचनदिने बहुसंख्यायां मतदानं कुर्वन्तु। काङ्ग्रेसस्य विभिन्नप्रवञ्चनानां भ्रष्टाचारस्य च आलोचनां कुर्वता तेनोक्तं यत् विगतदशवर्षेषु देशे एका अपि प्रवञ्चना न अभवत्। सः अवदत् यत् देशे निर्धनजनाः काङ्ग्रेसपक्षे विश्वासं त्यक्तवन्तः। ह्यः प्रारभ्य राज्ये प्रचारं कुर्वन् श्रीमोदी अद्य जूनागढ-जामनगरयोः सभासु अपि सम्बोधनं करिष्यति। तत्रैव काङ्ग्रेसनेता राजस्थानस्य पूर्वमुख्यमन्त्री च अशोकगहलोतः अहमदाबादनगरे वार्ताहरसम्मेलनं सम्बोधयन् आश्वासनं दत्तवान् यत् काङ्ग्रेसघोषणापत्रे समाजस्य प्रत्येकं वर्गाय न्यायस्य वचनम् अस्ति। श्री गहलोतः देशे लोकतन्त्रस्य सुरक्षायाः विषये चिन्ताम् अभिव्यक्तवान् तथा च भाजपायाः आलोचनां कृतवान् यत् तत् दलं जनान् भ्रामयति, महर्घता, वृत्तिहीनता इत्यादीनां प्रमुखविषयाणां उपेक्षां करोति। अद्य राज्ये आप नेत्री श्रीमतिः सुनीता केजरीवालः अपि प्रचारं कुर्वती अस्ति। भावनगरस्य आप प्रत्याशी उमेश मकवाना इत्यस्य पक्षे बोटाडनगरे मार्गप्रदर्शनम् आयोजितवती।

<u>केन्द्रीय अन्वेषण ब्यूरो (सीबीआई)</u>

केन्द्रीय अन्वेषण ब्यूरो (सीबीआई) द्वारा , अद्य कलकत्ता उच्चन्यायालये पश्चिमबङ्गस्य संदेशखालीनगरे अवैधभूमिप्रतिग्रहणस्य, धनाहरणस्य महिलानाम् उत्पीडनस्य च प्रकरणानाम् अन्वेषणस्य प्रारम्भिकस्थितिप्रतिवेदनं प्रस्तुतम्। प्रतिवेदनं कलकत्ता-उच्चन्यायालयस्य मुख्यन्यायाधीशस्य टी.एस. शिवग्नानमित्यस्य एवं च न्यायमूर्ति-हिरण्मय-भट्टाचार्यस्य पीठं प्रति समर्पितम्। प्रतिवेदनप्रस्तुतिकाले सीबीआई-अधिवक्ता केन्द्रीय-अधिकारिभ्यः संदेशखाली-स्थले भूमि-अभिलेखान् प्रदातुं राज्यसर्वकारस्य असहयोगस्य विषये अपि लिखितं प्रतिवेदनं दत्तवान् सीबीआई-अधिवक्ता अवदत् यत् केन्द्रीय-संस्थायाः समर्पित-वेबफलक-माध्यमेन संदेशखाली-नगरे अवैध-भूमि-अधिकरण-सम्बद्धानि प्रायः सप्तशतं-प्रकरणानि प्राप्तानि सन्ति।

<u>संयुक्तराष्ट्र-फिलीस्तीन</u>

संयुक्तराष्ट्रसङ्घे भारतस्य स्थायीप्रतिनिधिः रुचिरा कम्बोज् इत्यनया उक्तं यत् भारतं फिलीस्तीन इजरायलयोः च कृते 'द्विराज्यीय' समाधानार्थं प्रतिबद्धः अस्ति। संयुक्तराष्ट्रसङ्घस्य महासभायां सा अवदत् यत् भारतं 'द्विराज्य'समाधानस्य समर्थनं करोति यत्र फिलीस्तीनजनाः सुरक्षितसीम्नाम् अन्तः स्वतन्त्रदेशे स्वतन्त्रतया निवसितुं समर्थाः भवेयुः। श्रीमती रुचिरा कम्बोज् गत- वर्षस्य अक्टोबर्-मासस्य सप्तमे दिनाङ्के इजरायल्-देशे हमास-द्वारा कृतस्य आक्रमणस्य निन्दां कृतवती परन्तु अन्ताराष्ट्रिय-नियमानां, अन्ताराष्ट्रिय-मानवता-विधीनां च सर्वासु परिस्थितिषु सर्वैः आदरः करणीयः इति अपि सा अवदत्। भारतेन गाजाक्षेत्रे इजरायल-बन्धकानां

मुक्तेः कृते अपि आग्रहः कृतः। मानवीयसहायतायाः विषये कम्बोजमहोदयया उक्तं यत् भारतं फिलीस्तीनीजनानां सहायतां निरन्तरं करिष्यति। सा इदमपि अवदत् यत् गाजा-क्षेत्रस्य जनानां कृते मानवीय-सहायता तत्क्षणमेव वर्धनीया इति।

<u>आईएमडी– मौसम</u>

भारतस्य वातावरणविभागेन अद्यपर्यन्तं पश्चिमबङ्ग- झारखण्ड- ओडिशा- बिहार-प्रदेशेषु तीव्रतापतरङ्गः प्रचलति इति पूर्वानुमानं कृतम्। आईएमडी इत्यनेन उक्तं यत्, दक्षिणप्रायद्वीपीय-भारतस्य उपरि अपि शुक्रवासरपर्यन्तं एतादृश्यः परिस्थितयः अतीव सम्भाव्यन्ते। आगामिषु पञ्चदिनेषु महाराष्ट्र-रायलासीमा-गुजरात-तमिलनाडु-आन्ध्रप्रदेशानाम् उपरि, रविवासरपर्यन्तं मध्यभारतस्य उपरि च तापतरङ्गस्य अपेक्षा अस्ति। वातावरणविभागेन अग्रे शुक्रवासरपर्यन्तं गङ्गेटिकपश्चिमबङ्ग-पूर्वझारखण्ड-उत्तर-ओडिशा-रायलासीमा इत्यादीनां अधिकतमतापमानं चतुश्चत्वारिंशत्तः सप्तचत्वारिंशत् अंशसेल्सियसपर्यन्तं भविष्यति इति पूर्वानुमानम् अस्ति। उष्ण-आर्द्र-वातावरणेषु आगामिषु पञ्चदिनेषु तटीय-कर्णाटक-केरल-माहे-प्रदेशेषु एताः परिस्थितयः प्रचलन्ति इति आईएमडी-संस्थायाः कथनम् अस्ति अद्यपर्यन्तं पूर्वोत्तरभारतस्य उपरि वज्रपातेन सह प्रचण्डवृष्टेः अपि अत्यन्तं सम्भावना वर्तते। अस्य मासस्य तृतीयतः षष्ठपर्यन्तं जम्मू-कश्मीर-लद्दाख-गिल्गित-बाल्टिस्तान-मुजफ्फरबाद-उत्तराखण्ड-हिमाचलप्रदेशानाम् उपरि वज्रपात-विद्युत्-सहितं वर्षाणां हिमपातस्य च सम्भावना वर्तते।

<u>अमेरिकी फेड रिजर्व-</u>

अमेरिकीय फेडरल् रिजर्व् इत्यनेन षष्ठवारं प्रमुखकुसीदप्रतिशतता अपरिवर्तिता एव रक्षिता । द्विदिनात्मकस्य संघीयमुक्तापणसमितेः (FOMC) इत्यस्य सम्मेलनानन्तरं गतरात्रौ अमेरिकीय-एपेक्स-वित्तकोषेण सर्वसम्मत्या निर्णयः कृतः यत्, स्वस्य द्वि-प्रतिशत-महर्घता-लक्ष्यं प्रति अग्रे प्रगतेः अभावस्य उल्लेखं कृत्वा, ऋण-प्रतिशतता अपरिवर्तितं एव स्थास्यति इति उद्घोषितम् ।

<u>जम्मू-कश्मीरे सीमासुरक्षा</u>

जम्मू-कश्मीरे सीमासुरक्षाबलस्य सैनिकैः साम्बामण्डलस्य सीमाचौकरीगल् इत्यत्र गतरात्रौ भारतीयक्षेत्रे प्रवेशे प्रयतमानाः पाकिस्तानीय-आतङ्किनः मारिताः।

शतरंज- वैशाली

भारतीयशतरंजविदुषी वैशाली रमेशबाबू इति अन्ताराष्ट्रियशतरंजसङ्घेन FIDE इत्यनेन आधिकारिकतया ग्राण्डमास्टर् इति उपाधिना अलङ्कृता। वैशाली कोनेरु हम्पी, हरिका द्रोणवल्ली इत्येताभ्यां सह मिलित्वा तृतीया भारतीयमहिला अस्ति या अनेन उपाधिना अलङ्कृता। वैशाली स्पेनदेशे, गतवर्षे, लोब्रेगाट् ओपनप्रतियोगितायाम् आवश्यक- सार्धद्विसहस्रम् ईएलओ-अङ्कान् सम्पादितवती । परन्तु गतमासे टोरोन्टोनगरे अभ्यर्थीप्रतियोगितायाः समये FIDE परिषदः समागमस्य अनन्तरं एव आधिकारिकतया तस्याः कृते अयं उपाधिः दत्तः।

एशिया -युवा मुक्केबाजी :

एशियायाः अन्तर्द्वाविंशीयमुष्टामुष्टि- प्रतियोगितायां भारतीयमुष्टामुष्टिक्रीडकाः आर्यनः, यशवर्धनसिंहः, प्रियांशुः, साहिलः च कजाखास्थानस्य आस्तानानगरे उपान्त्यचक्रे प्रवेशं प्राप्तवन्तः। एकपञ्चाशत् किलोग्राममिते वर्गे आर्यनः उज्बेकिस्तानस्य जुरायवशाकरबोयं विरुध्य ५-० इति इत्यङ्कान्तरालेन विजयं प्राप्य भारताय सम्यक् आरम्भं कृतवान् । तस्य विजयस्य अनन्तरं यशवर्धनः सार्धात्रिषष्टिकिलोग्रामभारवर्गे इराणस्य मिरहमादी बाबहेदरीं पराजितवान् । प्रियांशुः (एकसप्ततिकिलोग्रामभारवर्गे तथा च साहिलः (अशीतिकिलोग्रामवर्गे वैजयन्तीं प्राप्तवन्तः ।

आई.पी.एल्.

आईपीएल् क्रिकेट्-क्रीडायां अद्य हैदराबाद-नगरे सनराइजर्स् हैदराबाद-दलं राजस्थान-रॉयल्स्-दलं विरुध्य क्रीडिष्यति। गतरात्रौ चेन्नैनगरस्य एम.ए.चिदम्बरम-क्रीडाङ्गणे पञ्जाब-किङ्ग्स्-दलेन चेन्नै-सुपर-किङ्ग्स्-दलम् सप्तस्तोभैः पराजितम् ।

।। इति वार्ता: ।।